# श्रीमद् भागवत रसिक कुटुंब

## जगन्नाथप्रणामः,श्री जगन्नाथ प्रार्थना

## ॥ जगन्नाथप्रणामः ॥

नीलाचलनिवासाय, नित्याय परमात्मने ।

बलभद्रसुभद्राभ्यां(ञ्), जगन्नाथाय ते नमः ॥ 1॥

जगदानन्दकन्दाय, प्रणतार्तहराय च ।

नीलाचलनिवासाय, जगन्नाथाय ते नमः ॥ 2॥

## ॥ श्री जगन्नाथ प्रार्थना ॥

रत्नाकरस्तव गृहं(ङ्) गृहिणी च पद्मा

किं(न्) देयमस्ति भवते पुरुषोत्तमाय ।

आभीरवामनयनाहृतमानसाय

दत्तं मनो यदुपते त्वरितं(ङ्) ग्रहाण ॥ 1॥

भक्तानामभयप्रदो यदि भवेत् किन्तद्विचित्रं(म्) प्रभो,

कीटोऽपि स्वजनस्य रक्षणविधावेकान्तमुद्वेजितः ।

ये युष्मच्चरणारविन्दविमुखा स्वप्नेऽपि नालोचकास्-

तेषामुद्धरण-क्षमो यदि भवेत् कारुण्यसिन्धुस्तदा ॥ 2॥